শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতং

# ॥ শ্রী সৌভাগ্যলক্ষ্মী মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী সৌভাগ্যলক্ষ্মী মঙ্গলম্ ॥

ক্ষীরোদমথনোদ্ভূতে দিশাগজসুপূজিতে।
ৱিষ্ণুৱক্ষঃ পদাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **1** ॥

সাৱরাধসুরাধীশসংস্তুতে নিজভূতযে।
সুসমৃদ্ধিপ্রদাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **2** ॥

পূর্ণে পূর্ণপ্রিযে তূর্ণং পূর্ণকামে মনোরমে।
পূর্ণলোকাশ্রযাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **3** ॥

মঙ্গলাযতনে সর্ৱমঙ্গলাভিষ্টুতে রমে।
মঙ্গলৎৱপ্রদাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **4** ॥

শ্রুতিস্মৃতিপুরাণাদিপ্রথিতাদ্ভুতৱৈভৱে।
সর্ৱসংপৎপ্রদাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **5** ॥

কল্যাণমণ্ডপাস্থানে সর্ৱকল্যাণদাযিনি।
কল্যাণতমরূপিণ্যা নিত্যং ভৱতু মঙ্গলম্ ॥ **6** ॥

দিৱ্যহর্ম্যতলাৱাসে দিৱ্যদৃষ্টিপ্রদাযিনি।
দিৱ্যনামযুতাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **7** ॥

সর্ৱসৌভাগ্যদে দেৱি ভারযপত্তনৱাসিনি।
ভদ্রপীঠস্থিতাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **8** ॥

পদ্মে পদ্মপ্রিযে পদ্মাসনমুখ্যসুপূজিতে।
পদ্মাক্ষদযিতাযাস্তে নিত্যং ভৱতু মঙ্গলম্ ॥ **9** ॥

ৱেদান্তলক্ষ্মণাভিখ্যযতিরাডাশ্রমাশ্রযে।
ৱেদান্তদেশিকারাধ্যে নিত্যং ভৱতু মঙ্গলম্॥ **10**॥

শ্রীৱাসরাঘৱপ্রোক্তং ইদং সৌভাগ্যদম্ সদা।
পঠন্তো মঙ্গলং ভক্ত্যা তে ভৱন্তি শ্রিযোন্নতাঃ॥ **11**॥

॥ ইতি শ্রী সৌভাগ্যলক্ষ্মী মঙ্গলং সমাপ্তম্॥